## विध्यत्यधनुषा । (८३/१६३५)

तत् इति द्वितीयासमर्थाद् विध्यति इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति, न चेद् धनुष्करणं भवति। पादौ विध्यन्ति [1]पद्याः शर्कराः । [2]ऊरव्याः कण्टकाः । अधनुषा इति किम् ? पादौ विध्यति धनुषा । ननु [3]असमर्थ-त्वादनभिधानाच्च च प्रत्ययो न भवति, न हि धनुषा [4]पद्य इति विवक्षितोऽर्थः प्रतीयते ? एवं तर्हि धनुष्प्रतिषेधेन व्यधनक्रिया विशेष्यते, यस्यां धनुष्करणं न सम्भाव्यते इति । तेन इह न भवति, चौरं विध्यति, शत्रुं विध्यति[5] देवदत्तः इति ॥

## धनगणं लब्धा । (८४/१६३६)

तद् इत्येव । धनगणशब्दाभ्यां [6]द्वितीयासमर्थाभ्यां लब्धा इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति। [7]धन्यः । गण्यः । लब्धा इति तृन्नन्तं, तेन द्वितीया समर्था विभक्ति[8]र्युज्यते ॥

## अन्नाण् णः । (८५/१६३७)

अन्नशब्दात् [9]तद् इति द्वितीयासमर्थात् लब्धा इत्येतस्मिन्नर्थे णः प्रत्ययो भवति । अन्नं लब्धा आन्नः ॥

## वशं गतः । (८६/१६३८)

वशशब्दात् तद् इति द्वितीयासमर्थाद् गतः इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति। वशं गतः वश्यः । [10]कामप्राप्तो विधेयः इत्यर्थः ॥

## पदमस्मिन् दृश्यम् । (८७/१६३९)

निर्देशात् एव[11] प्रथमा समर्थविभक्तिः । पदशब्दात् प्रथमासमर्थाद् [12]दृश्यार्थोपाधिकादस्मिन्निति सप्तम्यर्थे यत् प्रत्ययो भवति । पदं दृश्यम् अस्मिन् पद्यः कर्दमः । पद्याः पांसवः । शक्यार्थे [13]कृत्यः । शक्यते यस्मिन् पदं मूल्याः, [19]सुष्ठु द्रष्टुं प्रतिमुद्रोत्पादनेन स पद्यः कर्दमः । [15]कर्दमस्यावस्थोच्यते नातिद्रवो नातिशुष्क इति[16] ॥

## मूलमस्यावर्हि । (८८/१६४०)

मूलशब्दात् प्रथमासमर्थाद् आवर्हि इत्येवमुपाधिकादस्येति षष्ठ्यर्थे यत् प्रत्ययो भवति। [17]मूलमेषाम् आवर्हि मूल्या माषाः । मूल्या मुद्गाः । '[18]वृहू उद्यमने' (धा. पा. १३४८) । येषां मूलमावृह्यते उत्पाटयते ते मूल्याः, [19]सुष्ठु निष्पन्नाः । मूलोत्पाटनेन विना [20]सङ्ग्रहीतुं न शक्यन्ते इत्यर्थः ॥

---

1. पाद्याः क. 2. उदाहरणमिदं नास्ति फ. 3. असामर्थ्यात् फ. ज, असामान्यात् ह. 4. पाद्यः क. 5. धनुषा इत्यधिकम् फ. ज, देवदत्तः नास्ति फ. 6. तदिति इत्यधिकम् फ. 7. धनं लब्धा धन्यः। गणं लब्धा गण्यः ड. ब. 8. उच्यते ज. 9. तद् इति नास्ति ब. ह. ज. 10. कामप्राप्तो विधेये क, कामप्राप्ते विधेये ड, कामप्राप्तौ विधेये ज. 11. अत्र इत्यधिकम् ब. 12. दृश्योपाधिकात् ब. 13. कृत्यप्रत्ययः फ. 14. प्रति-मुद्रोत्पादनं येन क. इ. 15. समावस्था ज, मृदवस्था फ. 16. उच्यते इत्यधिकम् ज. फ 17. आबर्हणमाबर्हं उत्पाटनम् इत्यधिकम् ह. 18. वृह उद्यमे अ. ब. क, बृह उद्यमने आङ्पूर्वः ड. 19. न इत्यधिकम् क. 20. ग्रहीतुम् क.